ष्यादसम्" । ऋ । "स्वसारन्त्वाक्षणवै" । वन् । "पीवानं मेषम्" । "वर्णानान्तणतिनितान्तानाम्" १० । आदिरुदात्तः, एतः हरिणः, शितिः, पृश्निः, हरित् । "ह्रस्वान्तस्य ह्रस्वमन्त ताच्छील्ये" ११ । ऋद्वर्जं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः । "अक्षस्यादेवनस्य" १२ । आदिरुदात्तः, "तस्य नाक्षः" देवने तु "अक्षैर्मा दीव्य" । "अर्द्धस्यासमद्योतने" १३ । अर्द्धो ग्रामस्य, समेऽंशके तु अर्द्धं पिप्पल्याः । "पीतद्र्वर्थानाम्" १४ । आदिरुदात्तः, पीतद्रुः, सरलः । "ग्रामादीनाञ्च" १५ । ग्रामः, सोमः, यामः । "लुबन्तस्योपमेयनामधेयस्य" १६ । चञ्चेव चञ्चा, स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा । "न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्" १७ । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः, मेरुरिव मेरुः, व्याघ्रः, सिंहः, महिषः । "राजविशेषस्य यमन्वा चेत्" १८ । यमन्वा वृद्धः, आङ्ग उदाहरणम् । अङ्गाः प्रत्युदाहरणम् । "स्त्रीविषयवर्णाक्षुपूर्व्वाणाम्" २० । एषान्त्रयाणामाद्युदात्तः, स्त्रीविषयः, मल्लिका, वर्णः, श्येनी, हरिणी, अक्षुशब्दात् पूर्वोऽस्त्येषान्ते अक्षुपूर्वाः, तरक्षुः । "शकुनीनाञ्च लघुपूर्वम्" २१ । पूर्वं लघु उदात्तं स्यात्, कुक्कुटः, तित्तिरिः, । "नर्त्तुप्राण्याख्यायाम्" २२ । यथालक्षणं प्राप्तमुदात्तत्वन्न, वसन्तः, कृकलासः । "धान्यानाञ्च वृद्धक्षान्तानाम्" २३ । आदिरुदात्तः, कान्तानाम्, श्यामाकाः, षान्तानाम्, राजमाषाः । "जनपदशब्दानामषान्तानाम्" २४ । केकयः, "हयादीनामसंयुक्तलान्तानामन्तः पूर्व्वं वा" २५ । हयिति हलःसंज्ञा । पललम्, शललम्, हयादीनां किम् एकलः असंयुक्तेति किं मल्लः । "इगन्तानाञ्च द्व्यषाम्" २६ । आदिरुदात्तः, कृषिः एतानि २पादस्थानि । "मकरवरुड़पारेवतवितस्तेक्ष्वार्ज्जिद्राक्षाकलोमाकाष्ठायुतश्च काशीनामादिर्वा" ३,९, । एषामादिर्द्वितीयो वा उदात्तः । मकरः वरुड़ः । "छन्दसि च" १० । अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयम् वा उदात्तं ज्ञेयम् । "कर्दमादीनाञ्च" ११ । आदिर्द्वितीयं वोदात्तः । "सुगन्धितेजनस्य ते वा" १२ । आदिर्द्वितीयं ते शब्दस्येति पर्य्यायेण वोदात्ताः । "नपः फलान्तानाम्" १३ । आदिर्द्वितीयं वोदात्तम् । राजादनफलम् । "ईषान्तस्य हलादेरादिर्वा" १४ । हलीषा लाङ्गलीषा । उशीरदाशेरकपालपलाशशैवालश्यामाकशरीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्" १९ । "एषामादिरुदात्तः स्यात् । "महिष्याषाढयोर्ज्जायेष्टकाख्या चेत्" २० । आदिरुदात्तः, "महिषी जाया" आषाढा उपदधाति । एतानि ३पादस्थानि । "निपाता आद्युदात्ताः" फि० ४,१२ । स्वाहा "उपसर्गाश्चाभिवर्ज्जम्" फि० ४,१३ । तथा च पाणिनिशान्तनवाचार्य्यादिभिर्यस्यादेरुदात्तत्वं विहितं ते शब्दा लोके वेदे च आद्युदात्ता भवन्ति ।

**आद्यून** त्रि० आ+दिव–क्त ऊट् नत्वञ्च । औदरिके (पेटुक) जिगीषावर्ज्जिते । जिगीषायान्तु न नत्वम् । आद्यूतः । जिगीषया देवनकर्त्तरि । [ मावधिशेषपर्यन्ते ।

**आद्योपान्त** पु० आद्यावधि उपान्तः अन्तपर्य्यन्तः । प्रथ-

**आधमन** न० आधीयते आ+धा–कमनन् । बन्धकदाने आधौ, । "योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यस्य वाप्युपधिं पश्येत्तत् सर्वं विनिवर्त्तयेत्" स्मृतिः "एकोऽपि स्थावरे कुर्य्याद्दानाधमनविक्रयम्" स्मृतिः एकोऽह्यनीशः सर्वत्र दानाधमनविक्रये" कात्या०स्मृतिः आधिशब्देऽस्य विवृतिः ।

**आधमर्ण्य** न० अधमर्णस्य भावः कर्म वा ष्यञ् । ऋणग्रहणे अवश्यदेयद्रव्यस्वामित्वे "आवश्यकाधमर्ण्ययोर्णिनिः" पा० ।

**आधर्म्मिक** त्रि० अधर्मं चरति ठञ् । अधर्मशीले दैववशात् अधर्म्मानुष्ठातरि तु नास्य साधुत्वम् । अधार्म्मिक इत्यत्र तु न धार्म्मिक इति विग्रह इति भेदः ।

**आधर्ष** पु० आ+धृष–भावे घञ् । १तिरस्कारे २बलात्पीड़ने च

**आधर्षण** न० आ+धृष–भावे ल्युट् । १आधर्षे २बलात्पीड़ने ।

**आधर्षित** त्रि० आ+धृष–क्त अवैयात्ये इट् गुणश्च । १अवमानिते २तिरस्कृते ३बलात्कारेणाभिभूते च "स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः । आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" या० स्मृतिः धार्ष्ट्ये तु आधृष्ट इत्येव ।

**आधर्ष्य** त्रि० आ+धृष–णिच्–यत् । १अवमाननीये २बलात् पीड़नीये ३दुर्बले च भावे यत् । ४ दुर्बलत्वे न० । "आधर्ष्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् । विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः" नार० । "आधर्ष्यं दुर्बलत्वम्" व्य०त०रघु० ।

**आधान** न० आ+धा–भावे ल्युट् । संस्कारपूर्व्वकं वह्न्यादेः स्थापने १अग्न्याधाने २गर्भाधाने च । "आधाने सोमपाने च वपनं सप्तसु स्मृतम्" प्रा०त०पु० "भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि । पुनर्दारक्रियां कुर्य्यात्